# अलङ्काराणां स्वरूप-विभाग-ध्वनित्व-वाच्यत्वविमर्शः

**प्रि. डॉ. नरेन्द्रकुमार पण्ड्या** [१]

## भूमिका

संस्कृतवाङ्मयं शास्त्रकाव्यरूपेण द्विधा विभक्तमस्ति। काव्यरूपं वाङ्मयम् आनन्दप्राप्त्यादिनैकप्रयोजनकं विद्यते। **"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥"**[२] एतस्य काव्यस्य उत्कर्षकाः अपकर्षकाश्च पदार्थाः आलङ्कारिकैः विचारिता विद्यन्ते। काव्ये रसास्वादने यानि तत्त्वानि उपकारकाणि भवन्ति तानि तत्त्वानि उत्कर्षहेतुरूपाणि भवन्ति तथा च यानि तत्त्वानि काव्ये रसास्वादनविधौ अपकारकाणि विघातकानि विघ्नकराणि वा भवन्ति तानि तत्त्वानि अपकर्षकाणि कथ्यन्ते। काव्ये दोषाः अपकर्षकाः भवन्ति। गुणाः रीतयः अलङ्काराश्च काव्ये उत्कर्षकाः भवन्ति। काव्यस्य लक्षणं किमस्ति? काव्यस्य आत्मा कः? रसस्य उत्कर्षकाः के? रसस्य अपकर्षकाः के? इत्येते विषयाः साहित्यदर्पणे विश्वनाथेन एकस्यां कारिकायां चर्चिताः सन्ति। तद्यथा- **"वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः। उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः॥"**[३] गुणाः अलङ्काराः रीतयश्च काव्यस्य उत्कर्षकाः पदार्थाः सन्ति तत्रापि अलङ्काराणां क्षेत्रं विशालं विद्यते। अलङ्काराणामपि वाच्यत्वं ध्वनित्वं च सम्भवति। तेन अलङ्काराः न केवलं बहिरङ्गभूताः पदार्थाः अपि तु तेषां काव्ये अन्तरङ्गत्वं विद्यते। आचार्यः कुन्तकः **"सालङ्कारस्य अलङ्करणसहितस्य सकलस्य निरस्तावयवस्य सतः काव्यता कविकर्मत्वम्। तेनालङ्कृतस्य काव्यत्वमिति स्थितिः न पुनः काव्यस्यालङ्कारयोगः।"**[४] एवमिदं स्पष्टं प्रतीयते यदलङ्काराणां काव्ये महत्त्वं विद्यते। काव्यप्रकाशे आचार्यः मम्मटः काव्यलक्षणे शब्दार्थयोः सर्वत्र सालङ्कारत्वं क्वचित्तु स्फुटालङ्कारविरहेऽपि अर्थात् अस्फुटालङ्कारसद्भावे काव्यत्वं भवति। इत्थं मम्मटः काव्ये अलङ्काराणामवश्यं स्थितिं सर्वत्र तु स्फुटत्वेन रूपेण क्वचित् अस्फुटत्वेन रूपेण स्वीकरोति। पीयूषवर्षः जयदेवः चन्द्रालोके अलङ्काराणां काव्ये स्वाभाविकीं नियमेनावस्थितिम्

---

[१] प्राचार्यः , श्रीसोमनाथ संस्कृत युनिवर्सिटीसञ्चालित संस्कृत कोलेज, वेरावल, गुजरात

[२] का.प्र.-१/१

[३] सा.द.-१/३

[४] व.जी.-१/१६ इत्यत्र वृत्तिः

अङ्गीकरोति। अलङ्कारसाहित्ये अपि काव्यत्वस्वीकारस्तु अग्नेः अनुष्णत्व (शीतलत्व) स्वीकारवदसम्भव एवेति जयदेवीयं मतम् अस्ति। तद्यथा- **"अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती। असौ न मन्यते कस्मादनुष्णमनलङ्कृती॥"**[१]

## अलङ्कारलक्षणम्

अलं क्रियते इति अलङ्कारः अथवा अलङ्क्रियते अनेन इति अलङ्कारः। प्रथमव्युत्पत्तौ अलम्पूर्वकात् डुकृञ् करणे इत्यस्मात् डुकृञ् (कृ) धातोः भावार्थे घञ् प्रत्यये आभूषणं शोभा सौन्दर्यमित्यर्थो लभ्यते अथ च द्वितीयव्युत्पत्तौ करणार्थे घञ् प्रत्यये सौन्दर्यहेतुः शोभाहेतुः इति अर्थः लभ्यते। सौन्दर्यं सौन्दर्यहेतुश्चेति द्विविधोऽप्यर्थः अलङ्कारशब्दस्य काव्यशास्त्रे विलोक्यते। वामनाचार्यैः **"काव्यं ग्राह्यमलङ्कारात्। सौन्दर्यमलङ्कारः।"**[२] इत्यत्र अलङ्कारशब्दस्य सौन्दर्यमिति अर्थः स्वीकृतो विलोक्यते। आचार्यो दण्डी काव्यादर्शे काव्यशोभाकरान् धर्मान् अलङ्कारत्वेन स्वीकरोति तद्यथा- **"काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते। ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यते॥"**[३] अत्र काव्यशोभाकरत्वेन अलङ्काराः कथिताः। काव्यप्रकाशकृत् मम्मटाचार्यः शब्दार्थद्वारेण जातुचित् काव्ये सन्तं रसम् अनुप्रासादयः उपमादयश्च उपकुर्वन्ति ते अनुप्रासादयः शब्दालङ्काराः उपमादयश्च अर्थालङ्काराः प्रोच्यन्ते। अत्र अलङ्कारलक्षणकारिकायामपि अनुप्रासः (तकार-रेफ-दकाराणामनुप्रासः) हारादिवत् इति उपमालङ्कारश्च निहितः विद्यते। अतः यथा वृत्तरत्नाकरादिग्रन्थेषु वृत्तलक्षणसूत्रमेव तस्य लक्ष्यवाक्यम् उदाहरणवाक्यं भवति तथा अत्र अलङ्कारलक्षणवाक्यमेव अलङ्कारलक्ष्यवाक्यमपि भवति। अलङ्काराणां रसोपकारकत्वे सति एव अलङ्कारत्वमभिहितं मम्मटाचार्येण तदभावे नालङ्कारत्वमिति। हाराद्यलङ्काराणां शोभाकरत्वं विद्यते किन्तु यतः शरीरे धृताः हारादयः न शोभाकराः जायन्ते किन्तु हास्यावहा भवन्ति तथैव हारादयः शेखरादयः अलङ्काराः स्त्रीणामाभूषणानि भवन्ति किन्तु धर्मसंस्कृत्याद्यनुरोधेन विधवानां ते हारादयः शेखरादयः अलङ्काराः शोभावहा न भवन्ति। अत एव सुभाषिते **स्** इति। रसास्वादनविधौ उपकारका अलङ्कारा एव काव्ये उत्कर्षकत्वेन गणिताः सन्ति। साहित्यदर्पणकारो विश्वनाथोऽपि शब्दार्थयोः शोभातिशायिनः रसोपकारकाः शब्दार्थयोः अस्थिरा धर्माः अलङ्कारा इति लक्षयति। तद्यथा- **"शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः। रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥"**[४]

---

[१] च.लो.-१/

[२] का.लं.सू.- /१

[३] का.द.-२/१

[४] सा.द.-१०/१

**अलङ्करोतीति अलङ्कारः इत्येषा अलङ्कारशब्दस्य व्युत्पत्तिः विद्यते।**[१] शरीरस्य शोभावर्धकाः पदार्थाः अलङ्काराः कथ्यन्ते यथा कटककुण्डलादयः तथैव काव्यस्य शरीरभूतयोः शब्दार्थयोः शोभाकराः धर्माः अलङ्काराः कथ्यन्ते। शब्दालङ्काराः शब्दान् अलङ्कुर्वन्ति तद्द्वारा च रसोपकारका भवन्ति अर्थालङ्काराश्च अर्थान् अलङ्कुर्वन्ति तद्द्वारा च रसोपकारकाः भवन्ति। शब्दालङ्काराः अनुप्रास-यमकादयः सन्ति। अर्थालङ्काराः उपमादयः सन्ति। अलङ्काराः उत्कर्षकाः उत्कर्षाधायकाः सन्ति इति कथनेन अलङ्काराणां स्वरूपाधायकत्वं जीवनाधायकत्वं वा न सम्भवति इति अभिव्यक्तं भवति। अलङ्कारसहितोऽपि मनुष्यो भवति अलङ्काररहितोऽपि मनुष्यो भवति। अलङ्कारराहित्ये मनुष्यस्य मनुष्यत्वं न भवति इति तु न विद्यते स्थितिः। यदि अलङ्काराः धृतास्तर्हि उत्कृष्टता सम्भवति। काव्ये अलङ्काराणां विद्यमानत्वे उत्कर्षः अविद्यमानत्वे अपि न काव्यत्वस्य हानिः। काव्यप्रकाशकारेण अलङ्कारलक्षणे "जातुचित्" इति शब्दं प्रयुज्य तथा च साहित्यदर्पणकारेण "अस्थिराः" इति शब्दं प्रयुज्य अलङ्काराणां काव्ये वैकल्पिकी स्थितिः दर्शिता। किन्तु अलङ्काराणां काव्ये अस्थिरधर्मत्वम् इति मतं सर्वमान्यं सर्वग्राह्यं वा नास्ति। ध्वनिवादिसम्प्रदायस्य मतमिदम्, अलङ्कारसम्प्रदायः काव्ये अलङ्काराणामनिवार्यां स्थितिं मन्यते। अत एव जयदेवः अलङ्काररहितकाव्यकल्पना नाम अग्निरनुष्ण इति स्वीकारवदेव इति निरूपयति। यद्यपि ध्वनिवादिसम्प्रदायस्य मते ध्वनेरेव आत्मत्वेन तत्रापि मुख्यतया रसस्यात्मत्वेन काव्ये रसस्य सर्वाधिकं महत्त्वं विद्यते तथापि तन्मते अपि अलङ्काराणां लक्षणघटकत्वेन उत्कर्षकत्वेन शब्दार्थयोः शोभातिशयजनकत्वेन रसोपकारकतया काव्ये महत्त्वपूर्णं स्थानं विद्यते।

## अलङ्काराणां प्रकाराः सङ्ख्या च -

नाट्यशास्त्रकारात् भरतमुनेः आरभ्य अलङ्कारविषये आलङ्कारिकैः आचार्यैः चर्चा कृता विद्यते। अलङ्काराः शब्दार्थयोः धर्माः शब्दाश्रिताः अर्थाश्रिताः च भवन्ति तेन कारणेन त्रिविधाः अलङ्कारा भवन्ति। शब्दालङ्काराः, अर्थालङ्काराः शब्दार्थोभयालङ्काराश्च इति त्रिविधाः अलङ्काराः भवन्ति। ये अलङ्काराः शब्दनिष्ठाः शब्दजनितशोभाकराः काव्योपकर्षकाः रसोपकारकाः शब्दपरिवृत्त्यसहास्ते शब्दालङ्काराः ये च अर्थनिष्ठाः अर्थजनितशोभाकराः काव्योत्कर्षकाः रसोपकारकाः शब्दपरिवृत्तिसहास्ते अर्थालङ्काराः एवं ये अलङ्काराः शब्दार्थोभयनिष्ठाः शब्दार्थोभयजनितशोभाकराः काव्योत्कर्षकाः रसोपकारकाः शब्दार्थोभयधर्माः क्वचिदंशे शब्दपरिवृत्तिसहाः क्वचिदंशे शब्दपरिवृत्त्यसहास्ते शब्दार्थोभयालङ्काराः अथवा उभयालङ्कारा इति कथ्यन्ते। उभयालङ्कारे प्रायेण एक एव अलङ्कारः प्रसिद्धः अस्ति स च अस्ति पुनरुक्तवदाभासः इति।

---

[१] का.प्र., संपा.-आचार्य विश्वेश्वर, पृ.-३९९

अयं पुनरुक्तवदाभासः केवलशब्दनिष्ठोऽपि अस्ति शब्दार्थोभयनिष्ठोऽपि अस्ति। शब्दनिष्ठोऽपि सभङ्गरूपकेवलशब्दनिष्ठः अभङ्गरूपकेवलशब्दनिष्ठ इति रीत्या द्विविधः विद्यते। शब्दार्थोभयनिष्ठः उभयालङ्कारः पुनरुक्तवदाभासः एकधा अस्ति।

अलङ्काराणां सङ्ख्याविषये मतवैविध्यं विद्यते। भरतमुनिः नाट्यशास्त्रे उपमा, रूपकं, दीपकः, यमकं चेति चत्वारः अलङ्कारा इति निरूपयति। वामनाचार्यमते त्रयस्त्रिंशत् (३३) अलङ्काराः सन्ति। तत्रापि वामनाचार्यः शब्दालङ्कारेषु अनुप्रासं यमकं चेति द्वौ अलङ्कारौ मन्यते। दण्डी पञ्चत्रिंशत् (३५) अलङ्कारान् मन्यते। भामहः एकोनचत्वारिंशत् (३९) अलङ्कारान् मन्यते। रुद्रटः द्विपञ्चाशत् (५२) अलङ्कारान् स्वीकरोति। मम्मटः रुय्यकश्च सप्तषष्टिम् (६७) अलङ्कारान् स्वीकुरुतः । चन्द्रालोककारो जयदेवः शतम् (१००) अलङ्कारान् स्वीकरोति। अप्पयदीक्षितः चतुर्विंशत्यधिकं शतम् (१२४) अलङ्कारान् अङ्गीकरोति। अलङ्कारसङ्ख्यासङ्ग्रहश्लोकाः आचार्यविश्वेश्वरेण इत्थं निरूपिताः। यथा-

**"उपमा रूपकं चैव दीपको यमकस्तथा।**
**चत्वार एवालङ्कारा भरतेन निरूपिताः॥**

**वामनेन त्रयस्त्रिंशत् भेदास्तस्य निरूपिताः।**
**पञ्चत्रिंशद्विधश्चायं दण्डिना प्रतिपादिताः॥**

**नवत्रिंशद्विधाश्चायं भामहेन प्रकीर्तितः।**
**चत्वारिंशद्विधश्चैव उद्भटेन प्रदर्शितः॥**

**द्विपञ्चाशद्विधः प्रोक्तो रुद्रटेन ततः परम्।**
**सप्तषष्टिविधः प्रोक्तः प्रकाशे मम्मटेन च॥**

**शतधा जयदेवेन विभक्तो दीक्षितेन च।**
**चतुर्विंशतिभेदास्तु कृता एकशतोत्तराः॥**[१]

अलङ्कारसर्वस्वकारः रुय्यकः अलङ्काराणां सादृश्यादिमूलकत्वेन विभागं दर्शितवान्। तत्र सादृश्यमूलका अलङ्काराः एकोनत्रिंशत् सन्ति। तत्रापि भेदाभेदमूलकाः चत्वारः आपोकमूलकाः अभेदप्रधानाः षट्, अध्यवसायमूलकौ अभेदप्रधानौ द्वौ, गम्यौपम्यमूलकाः सप्तदश एवमाहत्य सादृश्यमूलकाः एकोनत्रिंशदलङ्काराः। विरोधमूलकाः अलङ्काराः एकादश, शृङ्गलाबन्धमूलकाः अलङ्काराः त्रयः, तर्कन्यायमूलकौ अलङ्कारौ द्वौ, वाक्यन्यायमूलकाः अलङ्कारा अष्ट, लोकन्यायमूलका अलङ्काराः सप्त, गूढार्थप्रतीतिमूलकाः अलङ्काराः सप्त। एवमेते

---

[१] का.प्र., सम्पा.- आचार्यविश्वेश्वर, पृ.-४४०

सादृश्यातिरिक्तमूलकाः अष्टत्रिंशदलङ्कारा भवन्ति। मम्मटेन एकषष्टिः अलङ्काराः प्रोक्ताः रुय्यकस्य वर्गीकरणे मम्मटोक्ताः एकषष्टिः अलङ्काराः तदतिरिच्य मम्मटानुक्ताः परिणामः, उल्लेखः, परिकराङ्कुरः, विचित्रः, अर्थापत्तिः विकल्पश्चेति षड् अलङ्काराः अधिकाः कथिताः एवमाहत्य रुय्यकस्य वर्गीकरणे सप्तषष्टिः अर्थालङ्काराः कथिताः सन्ति।

## अलङ्काराणां वाच्यत्व-गुणीभूतव्यङ्ग्यत्व-ध्वनित्वप्रकारैः त्रैविध्यम् -

अलङ्कारशब्दः अलङ्क्रियते अनेन इति करणार्थे "अकर्तरि च कारके संज्ञायाम्" इति पाणिनिसूत्रेण घञ् प्रत्यये कृते सिद्ध्यति। अत्र शब्दव्युत्पत्त्या अलङ्करणस्य शोभायाः सौन्दर्यस्य वा करणभूते साधकतमे पदार्थे अलङ्कारशब्दो विद्यते। कटककुण्डलादयो बाह्या अलङ्काराः यथा देहं भूषयन्ति तथा एव काव्याङ्गभूतयोः शब्दार्थयोः शोभाजनकाः अनुप्रासोपमादयः शब्दार्थालङ्कारा भवन्ति। नाट्यशास्त्रे भरतमुनिना चत्वारोऽलङ्काराः निरूपिताः। तद्यथा- **"उपमा दीपकं चैव रूपकं यमकं तथा। काव्यस्यैते ह्यलङ्काराश्चत्वारः परिकीर्तिताः॥"**[१] एते ह्यलङ्काराः शब्दार्थान्यतरनिष्ठा या चमत्कृतिः तच्चमत्कृतिजनका भवन्ति। अत एव सादृश्यस्मृतिसन्देहादिनिरूपणं काव्ये क्रियमाणं सत् चमत्कृतिं जनयन्ति तदा एव तेषामलङ्कारत्वं सम्पद्यते। अत एव वैचित्र्यं वक्रोक्तिर्वा सर्वालङ्कारेषु अपेक्ष्यते। अलङ्काराः वाच्या अपि भवन्ति व्यङ्ग्या अपि भवन्ति। अतः त्रिविधेषु ध्वनिषु रसवस्त्वलङ्कारेषु अलङ्कारस्य अपि गणना विद्यते। यत्र व्यङ्ग्यानां रसवस्त्वलङ्काराणां प्राधान्यं तत्र ध्वनित्वं भवति। इदमेव ध्वनिकाव्यं उत्तमकाव्यत्वेन परिगणितं मम्मटादिभिराचार्यैः। तदुक्तं यथा- **"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि। इदमुत्तमतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः॥"**[२] यत्र वाच्यादतिशयी अतिशयचमत्कारकारी व्यङ्ग्यार्थः तत्र ध्वनित्वं भवति। यत्र तु वाच्यादनतिशयिचमत्कारकारी अर्थात् वाच्यान्न्यूनचमत्कारकारी अथवा वाच्यसमानचमत्कारकारी व्यङ्ग्यार्थस्तत्र गुणिभूतव्यङ्ग्यत्वम्। यत्र व्यङ्ग्यार्थविशेषो नास्ति शब्दार्थयोः शोभातिशयकारकाः अलङ्काराः वाच्याः सन्ति तत्र वाच्यार्थालङ्कारा भवन्ति तत्र अर्थचित्रं नाम काव्यं भवति। यत्र शब्दालङ्कारजनिता चमत्कृतिरस्ति काव्ये व्यङ्ग्यार्थश्च न विद्यते तत्र शब्दचित्रं नाम काव्यं भवति। तदेव अवरकाव्यत्वेन परिगणितमाचार्यमम्मटेन। तद्यथा- **"शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतमिति॥"**[३]

---

[१] ना.शा.-१६/४०

[२] का.प्र.-१/४

[३] का.प्र.-१/५

अथ अलङ्काराणां ध्वनित्वं कथं भवतीति विचारणीये सति ध्वनिशब्दस्यानेकार्थवाचकता निरूप्यते यत् ध्वनिशब्दोऽलङ्कारशास्त्रे बहुषु अर्थेषु विद्यते। तत्र ध्वन्यते अस्मिन् इति ध्वनिः काव्यविशेषः ध्वनति ध्वनयति इति ध्वनिः व्यञ्जकः अर्थो वा, ध्वननं ध्वनिरिति व्यञ्जनाख्यो व्यापारः शब्दार्थनिष्ठः ध्वन्यते असौ इति ध्वनिः व्यङ्ग्यः रसादिरूपोऽर्थः। एवमिह अधिकरण-कर्तृ-भाव-कर्मार्थेषु व्युत्पत्त्या ध्वनिशब्दस्यार्थवैविध्यं विलोक्यते। आनन्दवर्धनाचार्या अपि **काव्यस्यात्मा ध्वनि**रित्यत्र[१] **व्यङ्ग्यार्थः, यत्रार्थः शब्दो वा**[२] इत्यत्र काव्यविशेषे प्रयुक्तवन्तः ध्वनिशब्दम्। अस्मिन् काव्ये को ध्वनिः इत्यत्र रसादिध्वन्यर्थे ध्वनिशब्दः प्रयुज्यते। व्यङ्ग्यार्थस्य त्रैविध्यात् ध्वनेस्त्रैविध्यं विद्यते। रसरूपो ध्वनिः, वस्तुरूपो ध्वनिः, अलङ्काररूपो ध्वनिश्चेति ध्वनेः त्रयो भेदाः सम्भवन्ति। अलङ्कारध्वनिशब्दे ध्वनिशब्दः त्रिरूपेषु ध्वनिषु अन्यतमे ध्वनिविशेषे विद्यते। अलङ्कारपदेनापि अर्थालङ्कार एवोच्यते। शब्दालङ्काराणां शब्दस्वरूपतया व्यङ्ग्यत्वासम्भवात् तत्र ध्वनित्वसम्भावना न विद्यते। तेन अलङ्कारशब्दोऽर्थालङ्कारपरः ध्वनिश्च व्यङ्ग्यार्थविशेषपरः। इत्थं चाऽत्र अलङ्कारश्चासौ ध्वनिश्चेति अलङ्कारध्वनिः इति सामानाधिकरण्येन कर्मधारयसमासेऽर्थबोधो जायते। ध्वनिः अलङ्कार्यो भवति तस्मात् स धर्मी एवं च अलङ्काराः धर्माः सन्ति ततश्च धर्मधर्मिणोः कथं सामानाधिकरण्यं भवति यतस्तत्र धर्मधर्मिणोः परस्परं भिन्नत्वं भवति। तत्रोच्यते यत् अलङ्कारः त्रिविधो भवति वाच्यो व्यङ्ग्यो वाच्यव्यङ्ग्योभयश्चेति वाच्यः अलङ्कारः उपमादिः, स एव उपमादिः अलङ्कारः व्यञ्जनावृत्तिवेद्यश्चेत् व्यङ्ग्यो भवति। तृतीयश्च वाच्यव्यङ्ग्यः समासोक्त्यादौ अभिव्यक्तो भवति। समासोक्तौ श्लिष्टैः विशेषणैः परस्य अप्रकृतगतव्यवहाररूपार्थस्य उक्तिः भवति। प्रकृतवृत्तान्ते व्यञ्जनया अप्रकृतव्यवहाररूपस्य अर्थस्य प्रतिपादनम् उक्तिः आरोपः समासोक्तिः कथ्यते। त्रिविधेषु वाच्य-व्यङ्ग्य-वाच्यव्यङ्ग्येषु अलङ्कारेषु वाच्यः अर्थालङ्कारः रसभावादेः व्यङ्ग्यार्थस्य उपस्कारकः भवति। यथा- **"श्रीनन्दनन्दनाश्लिष्टवृषभानुनृपात्मजा। तमालश्लिष्टवल्लीव राजतां मम चेतसि॥"**[३] अत्र राधाविषयकरतिभावो मुख्यः प्रधानभूतस्तस्य च उपस्कारकः पोषकः उत्कर्षकः उपमालङ्कारः अतोऽत्र वाच्योऽलङ्कारः। व्यङ्ग्योऽलङ्कारो यथा- **"आत्मानं किं निरुपमं तमालाश्लिष्टवल्लि हे! कान्त्या दृष्ट्वा प्रसन्नाऽस्ति न दृष्टं व्रजमण्डलम्॥"**[४] अस्मिन् श्लोके व्यङ्ग्या उपमा विद्यते। व्रजमण्डले श्रीकृष्णाश्लिष्टा राधा कान्त्या तव तुल्या इति व्यङ्ग्या उपमा ध्वनिता भवति। अतोऽत्र उपमालङ्कारध्वनिः अस्ति। तृतीयोऽलङ्कारः वाच्यव्यङ्ग्यो भवति। स च यथा- **"अयमये वृषभानुसुते रविः क्वचिदतीत्य तु पश्य**

---

[१] ध्व.लो.-१/१

[२] ध्व.लो.-१/१३

[३] अ.ध्व. पृ.-२०

[४] अ.ध्व. पृ.-१०

**निशां शनैः । निजकरैरधुना सभयं स्पृशन्ननुनयत्यतिविह्वलपद्मिनीम्॥"**[१] अत्र वाच्योऽर्थो रविकमलिनीवृत्तान्तः, व्यङ्ग्योऽर्थः अप्रकृतनायकनायिकाव्यवहारः। अप्रकृतनायकनायिकाव्यवहारेण व्यङ्ग्येन विना केवलो वाच्यार्थः न अलङ्कारो भवितुम् अर्हति। उभौ वाच्यव्यङ्ग्यार्थौ मिलित्वा एव अलङ्कारत्वं प्राप्नुतः। इत्थमेव अप्रस्तुतप्रशंसालङ्कारस्यापि वाच्यव्यङ्ग्यत्वं विद्यते। यथा- **"पिपासोर्बान्धवस्यापि तृप्तिं कर्तुं न चेत्क्षमः। पूर्णोऽहमिति गर्वं भो व्यर्थं मा कुरु वारिधे॥"**[२] अत्र प्रस्तुतः कृपणवृत्तान्तः अप्रस्तुतवारिधिवृत्तान्तेन वर्णितः। अत्र वाच्यं वारिधिवर्जनम्, व्यङ्ग्यं कृपणवर्णनम् अनयोः योगे एव अप्रस्तुतप्रशंसा अलङ्कारो भवति। अत्र एकोऽर्थः वाच्यः अपरोऽर्थः व्यङ्ग्यः उभयोः योगेन अप्रस्तुतप्रशंसालङ्कारो भवति। इत्थमेव च पर्यायोक्तालङ्कारे वाच्यवाचकभावभिन्नेन व्यञ्जनाव्यापारेण बोधितेन अर्थेन सह सम्भूयैव अलङ्कारत्वं सम्भवति। उदाहरणं यथा- **"राहोर्वधूनामुत्तुङ्गस्तनानां व्यर्थकारिणम्। क्षणतश्चक्रधारेण वन्दे तं चक्रधारिणम्॥"**[३] अत्र चक्रधारया राहुवधूत्तुङ्गस्तनव्यर्थकारिरूपोऽर्थः वाच्यः, राहुशिरश्छेदरूपकारणं व्यञ्जनया बोध्यते तच्च व्यङ्ग्यम् एतदुभयं मिलित्वा पर्यायोक्तालङ्कारो भवति अतः अयमलङ्कारो वाच्यव्यङ्ग्योभयात्मको भवति। इत्थमेव व्याजस्तुत्यलङ्कारोऽपि वाच्यव्यङ्ग्योभयात्मको भवति । व्याजस्तुत्यां मुखे निन्दा पर्यवसाने स्तुतिः अथवा मुखे स्तुतिः पर्यवसाने निन्दा भवति। तदुदाहरणं यथा- **"उद्दण्डो हन्त चाणूरः क्रूरः कंसोऽपि बालहा। स्वर्गं सम्प्रापितः कृष्ण का तवैषा दयालुता॥"**[४] **"धन्योऽसि कंस धन्योऽसि यत्त्वया दृढकर्मणा। लोकैकवीरकृष्णस्य कियन्तो भ्रातरो हताः॥"**[५] अत्र क्रमेण वाच्या केवलं निन्दा स्तुतिर्वा नालङ्कारः किन्तु व्यङ्ग्यया स्तुत्या निन्दया वा पर्यवसाने गम्यया अलङ्कारत्वं सम्भूय सिद्ध्यति न केवलं वाच्यार्थे। पूर्वश्लोके दयालुः श्रीकृष्णः सुकृतिनः स्वर्गं प्रापयति तथैव पापिनोऽपि स्वर्गं नयति इति स्तुतिः पर्यवसाने गम्यते। तथैव द्वितीयश्लोके स्तुत्या पर्यवसाने हे कंस! त्वमधन्योऽसि यतस्त्वया नैके निरपराधाः शिशवो हताः इति निन्दा अवगम्यते। अत्र उभयत्र व्याजस्तुतौ वाच्यव्यङ्ग्यार्थयोः योगेन अलङ्कारत्वं ने केवलयोः वाच्ययोः अलङ्कारत्वं भवति। अत एवात्र वाच्यव्यङ्ग्योभयात्मकत्वमलङ्कारस्य विद्यते। परिकरालङ्कारेऽपि वाच्यव्यङ्ग्योभयात्मकत्वं यथा - **"अप्यच्युत दयासिन्धो चक्रधारिन् विभो प्रभो। लोभमोहारिभिर्विद्धं कथं मां नावलोकसे॥"**[६] अत्र

---

[१] अ.ध्व. पृ.-२०

[२] अ.ध्व. पृ.-२१

[३] अ.ध्व. पृ.-२१

[४] अ.ध्व. पृ.-२१

[५] अ.ध्व. पृ.-२२

[६] अ.ध्व. पृ.-२२

साभिप्रायैः विशेषणैः व्यङ्ग्यार्थसहितोऽर्थः (वाच्यार्थः) अलङ्कारत्वं प्राप्नोति। केवलं वाच्यार्थस्य अभिप्रायार्थरहितस्य नालङ्कारत्वं जायते। भगवान् स्वभक्तरक्षाप्रतिज्ञां कृतवान् स कदापि स्वप्रतिज्ञाविमुखो न भवति इति अच्युतपदेन अभिव्यज्यते। दयासिन्धो इति सम्बोधनेन अकारणवात्सल्यम्, चक्रधारिन् इति सम्बोधनेन अमोघशस्त्रधारणेन सामर्थ्यम्, विभो इति सम्बोधनेन सर्वत्र व्याप्तत्वम्, प्रभो इति सम्बोधनेन स्वामित्वात् सेवकरक्षा अवश्यं करणीया इत्याद्यर्थाः व्यङ्ग्याः इत्थमत्र वाच्यव्यङ्ग्यार्थानां मिलितानामेव अलङ्कारत्वं न केवलानामिति अत्र परिकरालङ्कारेऽपि वाच्यव्यङ्ग्योभयालङ्कारत्वं भवति।

एतेषां समासोक्त्यादीनां वाच्यव्यङ्ग्योभयात्मकत्वं विद्यते। एषु अर्थेषु व्यङ्ग्यं वाच्योपस्कारकं भवति। वाच्यं प्रधानं न तु व्यङ्ग्यं प्रधानम्। तस्मादत्र समासोक्त्यादिषु अलङ्कारेषु वाच्यस्य प्राधान्यात् व्यङ्ग्यस्य गौणत्वात् गुणीभूतव्यङ्ग्यत्वं सिद्ध्यति।

एतेषु त्रिविधेषु वाच्येषु व्यङ्ग्येषु वाच्यव्यङ्ग्योभयात्मकेषु द्वितीयः प्रकारः व्यङ्ग्यात्मकः तत्र अलङ्कारध्वनित्वं विद्यते अन्ययोः द्वयोः न ध्वनित्वं किन्तु वाच्येषु चित्रकाव्यत्वम्, वाच्यव्यङ्ग्योभयात्मकेषु गुणीभूतव्यङ्ग्यत्वं भवति। अलङ्कारध्वनिस्तत्र भवति यत्र अलङ्कारः व्यङ्ग्यो भवति प्रधानश्च भवति। एवमत्र विज्ञेयं यत् यत्र अलङ्कारस्य व्यङ्ग्यत्वे सति प्राधान्यं तत्र अलङ्कारध्वनिः भवति। अलङ्कारध्वनौ अलङ्कारो धर्मितया विद्यते तेन सः अलङ्कार्यः न तु अलङ्कारः। अलङ्कारध्वनौ अलङ्कारस्य अलङ्कार्यत्वेऽपि अलङ्कारव्यवहारस्तु ब्राह्मणश्रमणन्यायेन भवति। त्रिषु अलङ्कारेषु वाच्यस्य अलङ्कारस्य ध्वनित्वं नास्ति एव तथा वाच्यव्यङ्ग्योभयात्मकस्य गुणीभूतव्यङ्ग्यकाव्ये अन्तर्भावः क्रियते। अवशिष्टः द्वितीयः प्रकारः यत्र व्यङ्ग्यस्य अलङ्कारस्य प्राधान्यं विद्यते तत्र अलङ्कारध्वनिरिति व्यवहारो विधीयते।

## अलङ्कारध्वनीनाम् उदाहरणानि -

ध्वनिस्त्रिविधो भवति रसरूपः वस्तुरूपः अलङ्काररूपश्च। तत्र रसरूपो ध्वनिः असंलक्ष्यक्रमव्यङ्ग्यः भवति। रसभावादौ व्यङ्ग्यस्यार्थस्य क्रमः संलक्षितो न भवति। यथा पद्मपत्रशते सूच्या विद्यमाने सति तत्र पद्मपत्रशतवेधनक्रियायां विद्यमानोऽपि क्रमः वेधनक्रियायाः अतिद्रुततरतया क्रमो लक्षितो न भवति तथैव रसभावादौ असंलक्ष्यक्रमव्यङ्ग्ये ध्वनौ व्यञ्जनाव्यापारस्य क्रमः संलक्षितो न भवति। द्वितीयो ध्वनिप्रकारः विद्यते संलक्ष्यक्रमव्यङ्ग्य इति। अयं ध्वनिः शब्दशक्त्युद्भवः अर्थशक्त्युद्भवः शब्दार्थोभयशक्त्युद्भवः इति त्रिविधः विद्यते। शब्दशक्त्युद्भवो ध्वनिः द्विविधः विद्यते वस्तुध्वनिः अलङ्कारध्वनिश्च। यत्र शब्दाद् वस्तु अथवा अलङ्कारः प्राधान्येन अवभासते स शब्दशक्त्युद्भवो ध्वनिः। शब्दशक्त्या यत्र अलङ्कारो ध्वन्यते तथाविधकाव्यानि काव्यग्रन्थेषु प्राप्यन्ते

तेषामुपरि विवरणं काव्यशास्त्रग्रन्थकारैः विधीयते। यथा- **"उल्लास्य कालकरवालमहाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन। निर्वाणितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः॥"**[१] अत्र प्राकरणिको राजपक्षीयोऽर्थः अप्राकरणिकः इन्द्रपक्षीयः अर्थः अनयोः उपमानोपमेयभावो भवति अन्यथा अप्राकरणिकार्थस्य असम्बद्धार्थाभिधानं वाक्ये दोषः भवति। अतोऽत्र उपमा अलङ्कारः शब्दशक्त्या प्रकाशते। एष च उपमालङ्कारो व्यङ्ग्यः विद्यते प्रधानश्च विद्यते। तस्मात् व्यङ्ग्यत्वे प्रधानत्वे च सति अलङ्कारध्वनिः भवति। अपरमुदाहरणं यथा- **"तिग्मरुचिरप्रतापो विधुरनिशाकृद्विभो मधुरलीलः। मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान्॥"**[२] अस्मिन् पद्ये तिग्मरुचिरप्रतापः इति एकं पदमपि भवति द्विपदमपि भवति। द्विपदत्वे तिग्मरुचिः अप्रतापः इति पदच्छेदो विद्यते। अत्र यः तिग्मरुचिः स कथम् अप्रतापो भवेत् तथैव यः विधुः स कथम् अनिशाकृद् भवेत्, यो मतिमान् स कथम् अतत्त्ववृत्तिः भवेत् तदा या प्रातिपत् (प्रतिपदा, प्रथमा तिथिः) सा कथम् अपक्षाग्रणीः भवेत् सा तु पक्षग्रणीः एव भवति। एवमेव मधुः (वसन्तः) अलील इति अत्रापि विरोधाभासो विद्यते। एवमत्र विरोधाभासो व्यङ्ग्यः तस्मादत्र शब्दशक्त्युद्भवः विरोधाभासालङ्कारध्वनिः। अन्यदुदाहरणं यथा- **"अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो। अटितः सहितः साधुयशोभिरसतामसि॥"**[३] अत्रापि विरोधाभासालङ्कारध्वनिः विद्यते। अमितः समितः इत्यत्र अटितः सहितः इत्यत्र च विरोधाभासोऽस्ति। विरोधाभासे विरोधस्य आभासो भवति तस्य च आभासितस्य विरोधस्य परिहारोऽपि भवति। अत्र विरोधाभासः व्यङ्ग्यः अस्ति प्रधानश्च अस्ति। प्राधान्यं चमत्कृत्यतिशयजनकतया भवति। अन्यदुदाहरणं यथा- **"निरुपादानसम्भारमभित्तावेव तन्वते। जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने॥"**[४] अत्र साधारणतया चित्रकारः चित्रनिर्माणाय उपादानसामग्रीं भित्तिं च अपेक्षते किन्तु कलाश्लाघ्यः शिवस्तथाविधः अद्भुतचित्रकारः विद्यते यः उपादानसामग्रीं विनैव, भित्तिं विनैव जगद्रूपं चित्रं रचयति। एवंविधवर्णनेन अत्र व्यतिरेकालङ्कारस्य अभिव्यक्तिः भवति। अयं व्यतिरेको व्यङ्ग्यः प्रधानश्च अस्ति। तस्मादत्र व्यतिरेकालङ्कारध्वनिः विद्यते। अलङ्काराणां प्रायेण अलङ्कारकत्वं शोभाजनकत्वं भवति अर्थात् अन्यस्य अलङ्करणं कुर्वन्ति अलङ्काराः। यदा शब्दालङ्काराः शब्दानामलङ्करणं कुर्वन्ति अर्थालङ्काराश्च अर्थानाम् अलङ्करणं कुर्वन्ति शब्दार्थोभयालङ्कारश्च शब्दार्थयोः अलङ्करणं करोति तथा सति ध्वनेः कथम् अलङ्कारशब्देन व्यपदेशः इति प्रश्नो भवति। ध्वनिः अलङ्कार्यो भवति तत्र समाधानरूपेण ब्राह्मणश्रमणन्यायः

---

[१] का.प्र., उदा.-५४ उल्ला.-४

[२] का.प्र., उल्ला.-४/उदा.-५५

[३] का.प्र., उल्ला.-४/उदा.-५६

[४] का.प्र., उल्ला.-४/उदा.-५७

उपस्थाप्यते पूर्वं ब्राह्मणो यः पश्चात् श्रमणो जातः तस्य व्यपदेशः ब्राह्मणोऽयं श्रमणः इति रीत्या विधीयते अर्थात् भूतपूर्वं ब्राह्मणत्वमुपादाय ब्राह्मणश्रमणः उच्यते तथैव अलङ्काराणां व्यङ्ग्यत्वे प्राधान्ये च अलङ्कार्यत्वं भवति। तथापि भूतपूर्वम् अलङ्कारत्वमुपादाय अलङ्कारध्वनिः अथवा व्यङ्ग्यः अलङ्कारः इति औपचारिकरूपेण कथ्यते। अयं न्यायः भूतपूर्वन्यायः इत्यपि कथ्यते।

शब्दशक्त्युद्भवः अलङ्कारध्वनिर्विद्यते तथैव अर्थशक्त्युद्भवोऽपि अलङ्कारध्वनिः विद्यते। अर्थशक्त्युद्भवः अलङ्कारध्वनिः वस्तुना अभिव्यज्यते अलङ्कारेण अपि अभिव्यज्यते। सोऽयमर्थशक्त्युद्भवः अलङ्कारध्वनिः येन वस्तुरूपेण अलङ्काररूपेण वाऽर्थेन अभिव्यज्यते सः अर्थः स्वतःसम्भवी कविप्रौढोक्तिसिद्धः कविनिबद्धवक्तृप्रौढोक्तिसिद्धश्च भवति तेनायमर्थशक्त्युद्भवः अलङ्कारध्वनिः षड्विधो भवति। "धन्यासि या कथयति......।" (का.प्र., उल्ला.-४/उदा.-६१) इत्यत्र वस्तुना वर्णितेन त्वमधन्या अहं तु धन्या इति रूपेण व्यतिरेकालङ्कारस्य व्यङ्ग्यार्थत्वं भवति। अतोऽत्र वस्तुना स्वतःसम्भविना व्यतिरेकालङ्कारध्वनिः विद्यते। अपरमुदाहरणं यथा- **"गाढकान्तदशनक्षत......."** (का.प्र., उल्ला.-४/उदा.-६३) इत्यत्र विरोधालङ्कारो वाच्यो विद्यते। तेन नृपेण स्वाधरनिर्दशनसमानकलम् अरयो निहता इति तुल्ययोगितालङ्कारध्वनिः तथा च मम क्षतिर्भवतु नाम किन्तु अन्यस्य क्षतनिवारणं भवतु इति नरपतिबुद्धेः उत्प्रेक्षा अभिव्यज्यते तेन उत्प्रेक्षालङ्कारध्वनिश्च भवत्यस्मिन् श्लोके। अपरमुदाहरणं यथा-

**"केशेषु बलात्कारेण तेन च समरे जयश्रीर्गृहीत ।**
**यथा कन्दराभिर्विधुरास्तस्या दृढं कण्ठे संस्थापिता ॥[१]"**

अस्मिन् पद्ये कविप्रौढोक्तिसिद्धेन वस्तुना केशग्रहणावलोकनेन उद्दीपितमदना इव इति अर्थो व्यज्यते तेन उत्प्रेक्षालङ्कारः, विजेतुः नृपस्य शत्रवः पूर्वं विजयदर्शनात् पलाय्य गुहासु तिष्ठन्ति इति काव्यहेतुरलङ्कारः। पराजितनृपाः न पलाय्य गुहासु स्थिताः किन्तु पराभवाशङ्कया तान् कन्दरा न त्यजन्ति इत्यादिः अर्थः अपह्नुतिरूपः अभिव्यज्यते। तेनाऽत्र उत्प्रेक्षालङ्कारध्वनिः काव्यहेत्वलङ्कारध्वनिः अपह्नुत्यलङ्कारध्वनिश्च व्यज्यते। अपरमुदाहरणं यथा - **"या स्थविरमिव हसन्ती कविवदनाम्बुरुहबद्धविनिवेश । दर्शयति भुवनमण्डलमन्यदिव जयति सा वाणी॥"** अस्मिन् पद्ये कविप्रौढोक्तिसिद्धेन उत्प्रेक्षालङ्कारेण वाच्येन चमत्कारैककारणं नवं नवं जगत् अजडासनस्थिता (कविमुखरूपचेतनासनस्था) कविवाणी विरचयति इति व्यतिरेकालङ्कारध्वनिः अत्र विद्यते। अधुना यथा कविप्रौढोक्तिसिद्धेन वस्तुना वा अलङ्कारेण वा ध्वनिराविर्भवति तथैव कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन वस्तुना वा अलङ्कारेण वा ध्वनिः आविर्भवति। तत्र

---

[१] का.प्र., उल्ला.-४/उदा.-६५

कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन वस्तुना अलङ्कारध्वनिर्यथा- **"सखि विरचय्य मानस्य मम धीरत्वेनाश्वासम्। प्रियदर्शनविशृङ्खलक्षणे सहसेति तेनापसृतम्॥"**[१] अस्मिन् पद्ये वर्णितेन वस्तुना नायकेन प्रार्थनं न कृतं तथापि नायिकाया मानं तिरोहितं सा नायिका प्रसन्ना जाता इति विभावनालङ्कारध्वनिः भवति एवं च प्रियदर्शनाय सौभाग्यबलं धैर्येण सोढुं न शक्यते इति उत्प्रेक्षालङ्कारध्वनिः भवति। अपरमुदाहरणं यथा- **"मदिलासहस्रभरिते तव हृदये सुभग सा अमान्ती। अनुदिनमनन्यकर्मा अङ्गं तन्वपि तनयति॥"**[२] अत्र पद्ये हेत्वलङ्कारो वाच्योऽस्ति तनोस्तनूकरणेऽपि तव हृदये सा न वर्तते इति विशेषोक्तिरलङ्कारः अभिव्यज्यते। तेन अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन अलङ्कारेण अलङ्कारध्वनिः अस्ति। एष च विशेषोक्तिध्वनिः विद्यते।

यथा शब्दशक्त्युद्भवः अर्थशक्त्युद्भवः अलङ्कारध्वनिः भवति तथैव शब्दार्थोभयशक्त्युद्भवोऽपि अलङ्कारध्वनिः भवति। अयं शब्दार्थोभयभूः ध्वनिः एकविधः विद्यते । तदुदाहरणं यथा- **"अतन्द्रान्द्राभरणा समुद्दीपितमन्मथा। तारकातरला श्यामा सानन्दं न करोति कम्॥"**[३] अस्मिन् पद्ये उपमालङ्कारध्वनिः विद्यते। प्रोक्तविशेषणविशिष्टा रात्रिरिव श्यामा (षोडशवर्षीया नायिका) विद्यते इति उपमा व्यज्यते। **"तदप्राप्तिमहादुःख......."**[४] इत्यादि पद्ये अशेषचयपदद्योत्यः अतिशयोक्तिध्वनिः विद्यते। अत्र वस्तुना अलङ्कारध्वनिः अस्ति। अन्यदुदाहरणं यथा- **"तव वल्लभस्य प्रभाते आसीऽधरो म्लानकमलदलम्। इति नववधूः श्रुत्वा करोति वदनं महीसम्मुखम्॥"**[५] इत्यस्मिन्पद्ये अधरः म्लानकमलदलम् इति वाच्येन रूपकेण अलङ्कारेण मुहुः मुहुः परिचुम्बनेन म्लानत्वम् इति मिलनपदद्योत्यः काव्यलिङ्गध्वनिः विद्यते। रूपकालङ्कारे प्रयुक्तं मिलाणपदं काव्यलिङ्गं द्योतयति। कविप्रौढोक्तिसिद्धवस्तुना अलङ्कारध्वनिर्यः प्रकाशते तत्र पदद्योत्यता अपि भवति। तदुदाहरणं यथा- **"निशितशरधिया........"**[६] इत्यत्र पद्ये व्यतिकरपदद्योत्यः विरोधः अलङ्कारः ध्वन्यते। अत्र वर्जितेन कविप्रौढोक्तिसिद्धेन वस्तुना युगपत् परस्परविरुद्धा अपि मदनावस्थाः उद्भवन्ति इति विरोधः अलङ्कारः विद्यते। स च व्यङ्ग्यः प्रधानश्च सन् ध्वनित्वं प्राप्नोति। कविप्रौढोक्तिसिद्धेन अलङ्कारेण अपि अलङ्कारध्वनिः भवति। तदुदाहरणं यथा- "स मुग्धश्यामलाङ्गः......."[७] अत्र पद्ये धम्मितलः स्मरः

---

[१] का.प्र., उल्ला.-४/उदा.-६९

[२] का.प्र., उल्ला.-४/उदा.-७१

[३] का.प्र., उल्ला.-४/उदा.-७२

[४] का.प्र., उल्ला.-४/उदा.-८०-८१

[५] का.प्र., उल्ला.-४/उदा.-८३

[६] का.प्र., उल्ला.-४/उदा.-८५

[७] का.प्र., उल्ला.-४/उदा.-८७

इति समरसङ्गर इति च रूपकालङ्कारः वाच्यः तेन च अत्र स्कन्धाद्बलं गृहीत्वा इत्यत्र स्कन्धशब्दः श्लेषेण अङ्गवाचकः सेनाश्रयरूपस्कन्धावारवाचकश्च तथैव बलशब्दोऽपि सामर्थ्यवाचकः सेनावाचकश्च। स्कन्धपदेन केशपाशरूपः स्मरः पुनः बलं प्राप्य समरसङ्गरं करोति तत्र च उत्कर्षेण वर्तते इति विभावनालङ्कारः ध्वन्यते। एकवारं युद्धं जातं तथापि पुनः स्कन्धात् बलं प्राप्य युद्धं पुनः प्रवृत्तम् इति विभावनालङ्कारः। सुरतसङ्ग्रामे समाप्तेऽपि अभिलाषो न निवृत्तः किन्तु पुनः प्रवृत्तिः जाता। अनिवृत्ताभिलाषत्वस्य हेतुः नास्ति तथापि अनिवृत्ताभिलाषत्वं विद्यते। अथ प्रबन्धेऽपि अर्थशक्त्युद्भवः ध्वनिः भवति। एतस्य ध्वनेः अपि द्वादश भेदा भवन्ति तत्रापि अलङ्कारध्वनिः भवितुम् अर्हति किन्तु एतस्य ध्वनेः काव्यप्रकाशे एकमेव उदाहरणं प्रदत्तं विद्यते। महाभारते शान्तिपर्वणि १५३ अध्याये गृध्रगोमायुसंवादे अर्थशक्त्युद्भवस्य प्रबन्धगतस्य उदाहरणं प्राप्यते। **"अलं स्थित्वा श्मशानेऽस्मिन्.......॥"** इत्यतः आरभ्य **"त्यजध्वमविशङ्किताः॥"**[१] इत्येतेषु चतुर्षु पद्येषु दिवा दर्शने मांसभक्षणे च समर्थस्य गृध्रस्य कथनस्य व्यङ्ग्यम् अस्ति यत् भवन्तः इमं मृतं बालकं परित्यज्यात्र गच्छन्तु इति मृतबालकसम्बन्धिपुरुषविसर्जनपरमिदं वचनं विद्यते। अत्र उत्तरयोः द्वयोः पद्ययोः शृगालस्य वचनं विद्यते तस्य तात्पर्यं यत् अधुना मा गच्छन्तु यावदादित्यः अस्ति तावत्तिष्ठन्तु अनन्तरं रात्रौ भवन्तः गच्छन्तु यदि अयं मृतः बालकः न जीवति चेत्। अयं वस्तुध्वनिः विद्यते। एवंविधा अन्ये अपि भेदा भवितुम् अर्हन्ति ते च ग्रन्थगौरवभयात् आचार्यमम्मटेन न प्रोक्ताः। स्वयमन्ये भेदा ऊह्या इति च सूचना कृता विद्यते। अलङ्कारध्वनिविमर्शग्रन्थरचयिता डॉ.कृष्णचन्द्रचतुर्वेदः अलङ्कारध्वनेः शब्दार्थोभयशक्तिमूलत्वेन त्रिधात्वं निरूप्य तेषां समेषां च अष्टौ प्रकारा भवन्ति इति निरूपितवान्। तत्र उभयशक्त्युद्भवालङ्कारध्वनिं विहाय अन्ये अलङ्कारध्वनयः पद-वाक्य-प्रबन्धप्रकाश्या भवन्ति। अलङ्कारध्वनिविमर्शग्रन्थे प्रबन्धप्रकाश्य ध्वनीनामुदाहरणानि प्रस्तुतानि सन्ति।

रघुवंशे रघुः अजाय राज्यधुरां दत्त्वा वानप्रस्थजीवनं स्वीकुर्वन् यदा विद्यते तदानीं कृतं वर्णनं विद्यते। तत्र- **"नृपतिः प्रकृतीरवेक्षितुं......"** इत्यारभ्य **"सिद्धिमुभाववापतुः॥"**[२] इति-पर्यन्तं कृते वर्णने काव्यलिङ्गेन तुल्ययोगितया वा रघोः अजस्य च प्रतीयमानो व्यतिरेकालङ्कारः प्रबन्धप्रकाश्यः विद्यते। अत्र अनेकपद्यात्मकप्रबन्धेन अयं ध्वनिः प्रकाशितो भवति इति हेतोः अस्य प्रबन्धप्रकाश्यता कथिता। श्रीमद्भागवते पुरञ्जनाख्याने पुरञ्जनवृत्तेन जीववृत्तान्तः वर्णितः तत्र पुरञ्जनाविज्ञातयोर्जीवेश्वरत्वेन अध्यवसितयोः अवगतिः जायते तस्मात् तत्र अतिशयोक्तिरलङ्कारः प्रबन्धेन प्रकाश्यते। एषा व्यङ्ग्या अतिशयोक्तिः अनन्तरे अध्याये नारदेन स्पष्टतया वर्णिता इति गुणीभूता भवति। तथापि अनन्तराध्ययनात् प्रागनुभूयमाना प्रतीतिः व्यङ्ग्या एव भवति। श्रीमद्भागवते एव भवाटवीवर्णनेऽपि

---

[१] का.प्र., उल्ला.-४/उदा.-९३-९६

[२] अ.ध्व. पृ.-८४

उपमालङ्कारः अभिव्यज्यते तत्रापि प्रबन्धप्रकाश्यः अलङ्कारध्वनिः। अत्रापि अनन्तराध्याये स्वयं प्रतीयमानार्थस्पष्टीकरणं कृतमतः गुणीभूतव्यङ्ग्यत्वं भवेत् किन्तु अत्रापि पूर्ववदेव अनन्तराध्यायाध्ययनात् प्राक् येषां व्यङ्ग्यार्थप्रतीतिः जायते सा प्रतीतिः ध्वनिरूपैव भवति।

## अलङ्कारध्वनिव्यञ्जकानामर्थानां त्रैविध्यम्-

मम्मटाचार्येण प्रायशः सर्वेषामेव अर्थानां व्यञ्जकत्वमपि भवति इति प्रोक्तमस्ति। तेन वाच्यलक्ष्यव्यङ्ग्यार्थाः त्रिविधा अर्थाः अलङ्कारध्वनेरपि व्यञ्जका भवन्ति। तेषामुदाहरणानि अलङ्कारध्वनिविमर्शे निम्नरूपेण प्रतिपादितानि सन्ति। वाच्यार्थस्य व्यञ्जकत्वं यथा- **"तिमिरं हरन्ति हरितां पुरःस्थितं तिरयन्ति तापमथ तापशालिनाम्। वदनत्विषस्तव चकोरलोचने परिमुद्रयन्ति सरसीरुहश्रियः॥"**[१] अस्मिन् पद्ये मुखस्य चन्द्ररूपत्वं गम्यते। अत्र व्यञ्जकः अर्थः वाच्यः विद्यते । रूपकालङ्कारध्वनिः विद्यते। रूपकालङ्कारस्य व्यञ्जकः स्वतःसम्भवी वाच्यः अर्थः अत्र व्यञ्जकः विद्यते। रसगङ्गाधरे- **"बधान द्रागेव द्रढिमरमणीयं परिकरं किरीटे बालेन्दुं नियमय पुनः पन्नगगणैः। न कुर्यास्त्वं हेलामितरजनसाधारणधिया जगन्नाथस्यायं सुरधुनि समुद्धार-समयः॥"**[२] एतत्पद्यमलङ्कारध्वनेः उदाहरणमस्ति। अत्र जगन्नाथ इति शक्यार्थ एव लक्ष्यार्थरूपेण अनेकपापविशिष्टजगन्नाथः इति लक्षयति। अयं च लक्ष्यार्थः नायं जगन्नाथः इतरपापिजनसाधारणः पापी अपि तु जगन्नाथो जगन्नाथ इव पापी इति अनन्वयालङ्कारध्वनिरेष अभिव्यज्यते अस्मिन् पद्ये। अयं ध्वनि लक्ष्यार्थेन अभिव्यज्यते । व्यङ्ग्यार्थस्य अपि अलङ्कारध्वनौ व्यञ्जकता भवति। **"कुञ्जे कैरवशालिनिर्झरतटे......॥"**[३] इत्यत्र पद्ये रूपकालङ्कारध्वनिः अस्ति। अत्र नायिकाप्रवेशे न दिने कुमुदगन्धेन कुमुदविकासो व्यज्यते। तेन व्यङ्ग्यार्थेन नायिकाया मुखं चन्द्रत्वेन प्रतीयते इति कविप्रौढोक्तिसिद्धेन व्यङ्ग्येन वस्तुरूपेण अर्थेन रूपकालङ्कारध्वनिः अभिव्यक्तो भवति। इत्थमत्र सुस्पष्टं जायते यत् त्रिविधानाम् अपि अर्थानां वाच्यलक्ष्यव्यङ्ग्यार्थानाम् अलङ्कारध्वनौ अभिव्यञ्जकत्वं भवति। अलङ्कारध्वनिरपि विशालं क्षेत्रं साहित्यजगति विद्यते। इमे अलङ्काराः सादृश्यादिना वर्ण्यमानाः काव्ये चमत्कारं जनयन्ति। वैचित्र्यमलङ्कारेषु सामान्यतः अनुस्यूतं भवति। अलङ्कारप्रदीपकारः पर्वतीयविश्वेश्वरपण्डितः उपमालङ्कारस्य लक्षणं कुर्वन् तत्र चमत्कारप्रयोजकत्वम् इत्यपि लक्षणघटकतया स्वीकरोति। तद्यथा- **"चमत्कारप्रयोजकं सादृश्यवर्णनमुपमा ॥१॥"**[४] अत्र

---

[१] अ.ध्व. पृ.-८७

[२] अ.ध्व. पृ.-८८

[३] अ.ध्व. पृ.-८८

[४] अ.प्र., सू.-१

उपमायां वर्ण्यमानं सादृश्यं प्रतीयमाना रसध्वनितः अप्राधान्यं भजमाना गुणीभूतव्यङ्ग्यत्वेन विराजते। अत एव अलङ्काराः गुणीभूतव्यङ्ग्यकोटौ प्रविष्टाः भवन्ति। इदं च निष्कृष्टतया प्रतिपादितं डॉ.तपस्विनान्दीमहाभागेन यथा - **"આનન્દવર્ધને અલંકાર માત્રને કેવળ ચિત્રકાવ્ય અથવા અવરકાવ્યની કોટિમાં ન મૂકતાં તેમાં રહેલા પ્રતીયમાન તત્ત્વ કે જે ચારુત્વ સર્જે છે- ને અનુલક્ષીને અલંકારોનો સમાવેશ ગુણીભૂતવ્યંગ્ય કોટીમાં કર્યો છે. તેઓ નોંધે છે કે (ધ્વન્યા.-૩/૩૬) આ વાચ્યાલંકારનો સમૂહ વ્યંગ્યાંશના અનુગમ દ્વારા (= સંસ્પર્શ દ્વારા) પરા શોભા પામતો કાવ્યમાં જણાય છે. તેઓ જણાવે છે (વૃત્તિ. ધ્વન્યા.-૩/૩૬) કે લગભગ દરેક અલંકારમાં અતિશયનું તત્ત્વ તો વત્તે ઓછે અંશે હોય જ છે, અને એ વિગત જ કાવ્યોત્કર્ષનું વહન કરે છે."**[१] (ભારતીયસાહિત્યશાસ્ત્રની વિચારપરંપરાઓ પૃ.-૫૧૧)

अनेन अलङ्काराणां गुणीभूतव्यङ्ग्यकोटौ आनन्दवर्धनाचार्याभिप्रेततया प्रदर्शितः विद्यते। इमे एव अलङ्काराः प्रधानत्वेन व्यङ्ग्यतया प्रतीयमाना भवन्ति तदा ध्वनिरूपा मन्यन्ते। अलङ्कारध्वनिः अपि व्यङ्ग्यत्वेन अलङ्काराणां प्राधान्येन प्रतीतौ भवति। अयं सल्लक्ष्यक्रमव्यङ्ग्यध्वनिप्रकारः विद्यते। वाच्यस्य तात्पर्यरूपेण प्रधानतया अलङ्कारध्वनिप्रतीतौ अलङ्कारध्वनिः भवति। अन्यथा गुणीभूतव्यङ्ग्यत्वं प्रायेण सिद्ध्यति। एतदपि सुष्ठु प्रोक्तं ध्वन्यालोके यथा- **"अर्थशक्तेरलङ्कारो यत्राप्यन्यः प्रतीयते। अनुस्वानोपमव्यङ्ग्यः स प्रकारोऽपरो ध्वनेः॥ रूपकादिरलङ्कारवर्गो यो वाच्यतां श्रितः। स सर्वो गम्यमानत्वं बिभ्रद् भूम्ना प्रदर्शितः॥ अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते। तत्परत्वं न वाच्यस्य नासौ मार्गो ध्वनेर्मतः॥"**[२]

## उपसंहारः

काव्यशास्त्रे अलङ्काराणां महत्त्वं सर्वविदितमेव वर्तते। वैचित्र्यम् अलङ्कारैः उद्भवति। तत्रापि तेषां व्यङ्ग्यतायां गुणभूतव्यङ्ग्यत्वं ध्वनित्वं वा जायते। यत्र अलङ्काराणां व्यङ्ग्यत्वे सति अप्रधानत्वं तत्र गुणीभूतव्यङ्ग्यत्वम्, यत्र अलङ्काराणां व्यङ्ग्यत्वे सति प्रधानत्वं तत्र ध्वनित्वमिति व्यवस्था विद्यते। अलङ्काराणां शब्देन अर्थेन शब्दार्थोभयेन च अभिव्यक्तिः भवति। अर्थोऽपि यदा अभिव्यञ्जको भवति तदा वाच्यः लक्ष्यः व्यङ्ग्यः भवति अर्थः तत्र क्रमेण अधिकचमत्कारो दृश्यते। इत्थम् अलङ्कारः चित्राख्ये अवरकाव्ये, गुणीभूतव्यङ्ग्यकाव्ये, मध्यमकाव्ये, ध्वनिकाव्ये उत्तमकाव्ये च विराजमानः काव्यशोभाजनको भवति। अलङ्कारस्य यथा नाम तथा गुणाः इति नयेन शोभातिशयजनकत्वं काव्ये सहृदयहृदयाह्लादकतया दृग्गोचरं भवति। अलङ्कारः इत्थं काव्यजगति विशालं क्षेत्रं व्याप्नोति।

---

[१] ભારતીયસાહિત્યશાસ્ત્રની વિચારપરંપરાઓ, પૃ.-૫૧૧

[२] ध्व.लो.-२/२५-२७

## सन्दर्भग्रन्थसूचिः


१. अलङ्कारध्वनिविमर्शः, लेखक- डॉ.कृष्णचन्दचतुर्वेदः, प्रका.- हंसा प्रकाशन, जयपुर, प्रथमसंस्करण- ई.स. १९९४

२. अलङ्कारप्रदीपः, पर्वतीयविश्वेश्वरप्रणितविरचितः, संपा.- डॉ.महाप्रभुलालगोस्वामी, प्रका.- चौखम्भा संस्कृत संस्थान, वाराणसी, द्वितीयसंस्करण- वि.सं. २०४३

३. काव्यप्रकाशः, संपा.- आचार्यविश्वेश्वर, प्रका.- ज्ञानमंडल लिमिटेड, वाराणसी, षष्ठसंस्करण- वि.सं. २०४२

४. ध्वन्यालोकः, संपा.- डॉ.गङ्गासागररायः, प्रका.- चौखम्भा संस्कृत भवन, वाराणसी, द्वितीयसंस्करण- वि.सं. २०६७

५. ભારતીયસાહિત્યશાસ્ત્રની વિચારપરંપરાઓ, લેખક - પ્રો.ડૉ.તપસ્વી નાન્દી, પ્રકા.- યુનિવર્સિટી ગ્રન્થનિર્માણ બોર્ડ, ગુજરાત રાજ્ય, અમદાવાદ, બીજી સંશોધિત આવૃત્તિ- ઈ.સ. ૧૯૮૪